श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्महाभारते

# ॥ श्री कृष्णद्वादशनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कृष्णद्वादशनामस्तोत्रम् ॥

श्रीकृष्ण उवाच
किं ते नामसहस्रेण विज्ञातेन तवाऽर्जुन।
तानि नामानि विज्ञाय नरः पापैः प्रमुच्यते ॥ 1 ॥

प्रथमे तु हरिं विद्यात् द्वितीयं केशवं तथा।
तृतीयं पद्मनाभं च चतुर्थं वामनं स्मरेत् ॥ 2 ॥

पञ्चमं वेदगर्भं च षष्ठं च मधुसूदनम्।
सप्तमं वासुदेवं च वराहं चाऽष्टमं तथा ॥ 3 ॥

नवमं पुण्डरीकाक्षं दशमं हि जनार्दनम्।
कृष्णमेकादशं विद्यात् द्वादशं श्रीधरं तथा ॥ 4 ॥

द्वादशैतानि नामानि विष्णुप्रोक्तान्यनेकशः।
सायंप्रातः पठेन्नित्यं तस्य पुण्यफलं शृणु ॥ 5 ॥

चान्द्रायणसहस्राणि कन्यादानशतानि च।
अश्वमेधसहस्राणि फलं प्राप्नोत्यसंशयः ॥ 6 ॥

अमायां पौर्णमास्यां च द्वादश्यां तु विशेषतः।
प्रातःकाले पठेन्नित्यं सर्वपापैः प्रमुच्यते ॥ 7 ॥

॥ श्री कृष्णद्वादशनामस्तोत्रं समाप्तम् ॥